## H. Ambedkar Jayanti Celebrated

The 126th Birth Anniversary of the Father of Indian constitution, Bharath Ratna Dr. B.RAmbedkar was celebrated in the Rashtriya Sanskrit Vidyapeetha on 14.04.2019. A Programme was organized in Ramaranjan Mukharjee Auditorium of the Vidyapeetha to commemorate the day. Prof. VSR Anjaneyulu, Former Registrar, S.V.Institute of Medical Sciences, Tirupati was the Chief Guest and Prof. Kolakaluri Madhu Jyothi, Professor, Sri Padmavathi Mahila Visvavidyalayam, Tirupati was the Geust of Honour. This programme was conducted under the presidentship of Hon'ble Vice Chancellor, Sri V. Muralidhara Sharma. Dr. D.Nallanna, Asst. Professor, Dept. of Telugu was the Master of Ceremonies.

# बाबासाहेव डा.भीमराव अम्बेदकरजन्मदिवस:




भारतरत्न-बाबासाहेव डॉ.भीमराव अम्बेदकरमहोदयानां जन्मदिनं पुरस्कृत्य भारतवर्षे सर्वत्र अप्रैलमासस्य चतुर्दशदिनाङ्कः अम्बेदकरजयन्ती अथवा भीमजयन्ती इति नाम्ना परिपाल्यते । तदनुकृत्य विद्यापीठेऽपि प्रतिवर्षमिव अस्मिन् वर्षे जन्मदिवसोत्सवः अयं महता वैभवेन 14.04.2019 दिनाङ्के पर्यपाल्यत । अस्मिन् उत्सवे श्रीवेङ्कटेश्वरचिकित्साविज्ञानकेन्द्रस्य (SVIMS) भूतपूर्व-कुलसचिवाः **आचार्य वि.एस्.आर्.आञ्जनेयुलुमहाभागाः** मुख्यातिथयः तथा च तिरुपतिस्थश्रीपद्मावतीमहिलाविश्वविद्यालयस्य आचार्या **आचार्यश्रीकोलाकालुरीमधुज्योतिमहाभागाः** सारस्वतातिथयः आसन् । आचार्यरमारञ्जमुखर्जिसभाङ्गणे समायोजितायाः सभायाः अध्यक्षाः विद्यापीठस्य मान्याः कुलपतयः **आचार्य वि.मुरलीधरशर्मवर्याः** आसन् । तेलुगुविभागस्य वरिष्ठाध्यापकाः **डॉ.डि.नल्लानामहाभागाः** सभां समचायलयन् । सर्वेऽपि विद्यापीठस्य कुलसचिवसमेताः अध्यापकाः, कर्मचारिणः, छात्राः अवसरेऽस्मिन् समुपस्थाय अम्बेदकरमहोदयानां चित्रफलके पुष्पाञ्जलिं समार्पयन् ।